Total Pages 02 PKC/PG/IS/SAN-101/16

**2016**

**M.A.**

**1st Semester Examination**

**SANSKRIT**

**PAPER – SAN – 101**

***Full Marks : 50***

***Time : 2 Hours***

***Answer all questions***

***The figures in the right hand margin indicate marks***

***Candidates are required to give their answers in their own words as far as practicable***

***Illustrate the answers wherever necessary***

*सर्वे प्रश्नाः सुरगिरा समाधेयाः।*

**1. अधःसमुद्धृतेषु यथाभिमतं मन्त्रद्वयमृषिच्छन्दोदेवतानिर्देशपुरःसरं सायणदिशा साधुव्याख्यायताम्-** **6X2**

क) स नः पितेव सूनवेऽग्ने सूपायनो भव।
सचस्वा नः स्वस्तये ॥

ख) इन्द्रवायू इमे सुता उप प्रयोभिरा गतम् ।
इन्दवो वामुशन्ति हि ॥

ग) पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥

घ) येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥

***(Turn Over)***

ङ) सप्त चक्रान्वहति काल एष सप्तास्य नाभीरमृतं न्वक्षः।
स इमा विश्वा भुवनान्यञ्जत् कालः स ईयते प्रथमो नु देवः॥

**2. अधःस्तनयोरेकतरस्य भाष्यवचनस्याशयः स्पष्टीक्रियताम्-** **6**

क) तस्मिन् सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः।

ख) वायवा याहीत्यादयस्तृचाः प्रउगशस्त्रे विनियुक्ताः।

**3. अधःस्थेषु यथेच्छं पदद्वयस्य साधनप्रक्रिया प्रदर्शनीया-** **2X2**

क) दिवेदिवे ख) वक्षति ग) श्रुधी घ) नेनीयते।

4. इन्द्रस्य उषसो वा वैदिकदेवतायाः स्वरूपं संक्षेपेण उपस्थातव्यम्। **8**

**अथवा**

अथर्ववेदे भूमिसूक्तस्य काव्यसौन्दर्यं यथायथं प्रतिपाद्यताम्।

5. पञ्चानां महायज्ञानां नामान्युल्लिख्य ब्रह्मयज्ञस्य स्वरूपं फलञ्च विस्तरेण शतपथोक्तदिशा विव्रियताम्। **10**

**अथवा**

**अधःसमुद्धृतं ब्राह्मणसन्दर्भद्वयं सप्रसङ्गं व्याख्यायताम्-** **5X2**

क) आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः।
शेते निपद्यमानस्य चरति चरतो भाग्यश्चरैवेति ॥

ख) अहरहर्भूतेभ्यो बलिं हरेत्। तथैतं भूतयज्ञं समाप्नोत्यहरहर्दद्योद-पात्रात् तथैतं मनुष्ययज्ञं समाप्नोति।

**(*Internal Assessment :10 marks*)**

***समाप्तम्***